# ॥ वैयाकरणसिद्धान्तकौमुदी ॥

## संज्ञाप्रकरणम् (१)

१४.०७.२०१०

# भट्टोजीदीक्षितप्रणीता
# ॥ वैयाकरणसिद्धान्तकौमुदी ॥

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥

वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम् ।
पाणिनिं सूत्रकारं च प्रणतोऽस्मि मुनित्रयम् ॥

मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च ।
वैयाकरणसिद्धान्तकौमुदीयं विरच्यते ॥

- व्याकरणम् – व्याक्रियन्ते = निष्पाद्यन्ते शब्दा अनेनेति व्याकरणम् ।

- संस्कृतव्याकरणस्य प्रमाणभूताः आचार्याः त्रयः – पाणिनिः, कात्यायनः/वररुचिः, पतञ्जलिश्च

# अष्टाध्यायी सिद्धान्तकौमुदी च

- व्याकरणसम्बद्धाः सर्वे नियमाः पाणिनिना सूत्ररूपेण 'अष्टाध्यायी' इत्याख्ये ग्रन्थे निबद्धाः । एतानि सूत्राणि अष्टसु अध्यायेषु विभक्तानि (अत एव ग्रन्थस्य 'अष्ट-अध्यायी' इत्यन्वर्थं नाम) । प्रतिपादं चत्वारः पादाः । आहत्य ३२ पादेषु सूत्राणि योजितानि । सूत्राणां संख्या ~४००० । (कौमुदीकारमतेन ३९७८ सूत्राणि) ।

अष्टाध्याय्यां क्वापि सूत्राणामर्थविषये चर्चा नास्ति, उदाहरणान्यपि न दीयन्ते । केवलं सूत्राणि अविच्छिन्नतया उक्तानि । तस्मात् सूत्राणामर्थम्, उदाहरणं च स्पष्टीकर्तुं वृत्तिग्रन्थाः प्रणीताः, येषु सूत्रम्-वृत्तिः(सूत्रार्थः)-उदाहरणम् इत्येतस्मिन् क्रमे सूत्राध्ययनं कर्तुं शक्यते । बहुषु वृत्तिग्रन्थेषु अष्टाध्यायीक्रमेणैव सूत्राणि व्याख्यातानि, यतो हि, सूत्राणां क्रमस्य महत् प्रामुख्यमस्ति । सूत्रक्रमानुरोधेनैव बहुत्र प्रक्रियानिर्वाहः क्रियते । किञ्च, सूत्राणि प्रकरणानुसारं निबद्धानि – यथा, सर्वाणि कारकसम्बन्धि सूत्राणि प्रथमाध्यायस्य चतुर्थपादे, समासविधायकानि सूत्राणि द्वितीयाध्यायस्य प्रथमद्वितीयपादयोः, सन्धिसूत्राणि षष्ठाध्यायस्य प्रथमपादे, इत्यादि । तस्मात्, अष्टाध्यायीक्रमेण अध्ययने कृते प्रकरणानां सम्पूर्णं ज्ञानं प्राप्तुं शक्यते ।

- किन्तु प्रक्रियाणाम् अध्ययने अस्मिन् क्रमे कश्चन क्लेशः अनुभूयते । उदाहरणार्थम्, 'रामः' इति रूपस्य प्रक्रिया एवं भवति
- राम ('अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति प्रातिपदिकसंज्ञा – १.२.४५)
- राम सु ('स्वौजस्....' इत्यादिना सुप्रत्ययः – ४.१.२)
- राम स् ('उपदेशेऽजनुनासिक इत्' इति उकारस्य इत्संज्ञा, लोपश्च – १.३.२, १.३.९)
- राम र् ('ससजुषो रुः' इति सकारस्य रुत्वम् – ८.२.६६)
- रामः ('खरवसानयोर्विसर्जनीयः' इति रेफस्य विसर्गः – ८.३.१५)

एवं 'रामः' इति एकं रूपं साधयितुम् अष्टमाध्यायपर्यन्तमध्येतव्यं भवति । एतदेव मनसि निधाय प्रक्रियानुकूलाः बहवो ग्रन्थाः विरचिताः, येषामध्ययनेन प्रक्रियाणां ज्ञानं सुलभतया स्यात् । तादृशेषु ग्रन्थेषु 'वैयाकरणसिद्धान्तकौमुदी' मूर्धन्या ।

# सिद्धान्तकौमुद्याः रचनाक्रमः

- सूत्रक्रमे भेदः ।
- सूत्रार्थः, उदाहरणानि ।
- दलकृत्यम् ।

# प्रकरणानि

१. संज्ञाप्रकरणम्
२. परिभाषाप्रकरणम्
३. अच्सन्धिप्रकरणम्
४. अच्सन्धौ प्रकृतिभावः
५. हल्सन्धिप्रकरणम्
६. विसर्गसन्धिप्रकरणम्
७. स्वादिसन्धिप्रकरणम्

# प्रकरणानि

८. अजन्तपुँल्लिङ्गप्रकरणम्
९. अजन्तस्त्रीलिङ्गप्रकरणम्
१०.अजन्तनपुंसकलिङ्गप्रकरणम्
११.हलन्तपुँल्लिङ्गप्रकरणम्
१२.हलन्तस्त्रीलिङ्गप्रकरणम्
१३.हलन्तनपुंसकलिङ्गप्रकरणम्
१४. अव्ययप्रकरणम्
१५.स्त्रीप्रत्ययप्रकरणम्
१६. कारकप्रकरणम्

# प्रकरणानि

- समासप्रकरणम्
- तद्धितप्रकरणम्
- दशगणी
- सनाद्यन्ताः
- पूर्वकृदन्ताः
- उणादिप्रकरणम्
- उत्तरकृदन्ताः
- वैदिकप्रक्रिया
- स्वरप्रक्रिया

# किं नाम सूत्रम् ?

- अल्पाक्षरम् असन्दिग्धं सारवद् विश्वतोमुखम् ।
- अस्तोभम् अनवद्यं च सूत्रं सूत्रविदो विदुः ॥
- 